क्षरोमनुः। सार्द्धद्वादशवर्णो वा भूमितः स तु निन्दितः। सार्द्धबीजत्रयस्तद्वदेकविंशतिवर्णकः। विंशदर्णस्त्रिंशदर्णोऽशःस्यादालिङ्गितः स्मृतः। द्वाविंशत्यक्षरो मन्त्रो मोहितः परिकीर्त्तितः। द्वात्रिंशदर्णो मन्त्रोयः सप्तविंशतिवर्णकः। क्षुधार्त्तः स तु विज्ञेयश्चतुर्विंशतिवर्णकः। एकादशाक्षरोवाऽपि पञ्चविंशतिसंख्यकः। त्रयोविंशतिवर्णो वा मन्त्रोऽतिदीप्तईरितः। षड्विंशत्यक्षरोमन्त्रः षट्त्रिंशदर्णकस्तथा। त्रिंशदेकोनवर्णो वा स्वङ्गहीनः स एव हि। अष्टाविंशत्यक्षरोय एकत्रिंशदथापि वा। अतिक्रुद्धः स विज्ञेयो निन्दितः सर्वकर्म्मसु। त्रिंदशदक्षरकोमन्त्रस्त्रयस्त्रिंशदथापि वा। अतिक्रूरः स विज्ञेयो निन्दितः सर्वकर्म्मसु। चत्वारिंशत्तमा विद्या त्रिषष्टिर्यौवता भवेत्। तावत्संख्या निगदिता मन्त्राः सत्रीडसंज्ञकाः। पञ्चषष्ट्यक्षरा ये स्युर्मन्त्रास्ते शान्तमानसाः। एकोनशतपर्य्यन्तं पञ्चषष्ट्यक्षरादितः। ते सर्वे कथितामन्त्राः स्थानभ्रष्टा न शोभनाः। त्रयोदशाक्षरा ये स्युर्मन्त्राः पञ्चदशाक्षराः। विकलास्तेऽभिधीयन्ते शतंसार्द्धशतं तथा। शतद्वयं द्विनवतिरेकहीना तथापि वा। यावच्छतत्रयं संख्या निःस्नेहास्ते प्रकीर्त्तिताः। चतुःशतमथारभ्य यावद्वर्णसहस्रकम्। अतिवृद्धः स मन्त्रस्तु सर्वशास्त्रविवर्ज्जितः। सहस्रार्णाधिका मन्त्रा दण्डकाः पीड़िताह्वयाः। द्विसहस्राक्षरामन्त्राः खण्डशःसप्तधा कृताः। ज्ञातव्यास्तोत्ररूपास्ते मन्त्राएते यथास्थिताः। तथा विद्याश्च बोद्धव्या मन्त्रिभिः सर्वकर्म्मसु। दोषानिमानविज्ञाय योमन्त्रं भजते बुधः। सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि” अथ मन्त्राणां दोषशान्तिः तदुक्तं तत्रैव “छिन्नादिदुष्टाये मन्त्रास्तन्त्रेतन्त्रे निरूपिताः। ते सर्वे सिद्धिमायान्ति मातृकार्णप्रभावतः। मातृकार्णैः पुटीकृत्य मन्त्रं विद्यां विशेषतः। शतमष्टोत्तरं पूर्वं प्रजपेत् फलसिद्धये। तदा मन्त्रोमहाविद्या यथोक्तफलदा भवेत्। मातृकापुटितं कृत्वा मध्ये वर्णान्निधाय च। मन्त्रवर्णांस्ततः कुर्य्यात्क्षोभनन्तत्र सम्मतम्। बद्ध्वा तु योनिमुद्रां तां संङ्कोचप्राधारपङ्कजम्। तत्रोत्पन्नान् मन्त्रवर्णान् कुर्वतस्य गतागतान्। ब्रह्मरन्ध्रावधि ध्यात्वा वायुमापूर्य्य कुम्भयेत्। सहस्रं प्रजपेन्मन्त्रं मन्त्रदोषोपशान्तये”। तथा। “एषु दोषेषु प्राप्तेषु मायां काममथापि वा। जिह्वा चादौ श्रियं चैव तद्दूषणविमुक्तये”। तथा। “तारसंपुटितोवापि दुष्टमन्त्रोऽपि सिध्यति। यस्य यत्र भवेद्भक्तिः सोऽपि मन्त्रोऽस्य सिध्यति” तथा। “प्रणवोमातृका देवी हृल्लेखेत्यमृतत्रयम्। अमृतत्रयसंयोगाद्दुष्टमन्त्रोऽपि सिध्यति” तत्र विद्यायां “कुमारी या च विद्येयं त्वया शम्भा पतिव्रते!। केवलं शिवरूपेण शक्तिरूपेण केवलम्” मुण्डमा०। १७स्वरोदयोक्ते बालादिचक्रस्थे स्वरभेदे पु०चक्रशब्दस्यबालादिचक्रे विवृतिः। तत्र स्कन्दे “अग्नेः पुत्रः कुमारस्तु श्रीमान् शरवणालयः” भा० आ० ६६अ०। “कुमारमभिगम्याथ वीराश्रमनिवासिनम्। अश्वमेधमवाप्नोति नरो नास्त्यत्र न संशयः” भा० व० ८४अ०। तस्य कन्दर्पापेक्षयाधिकसौकुमार्य्यात्तथात्वम्। १८बालोपद्रावकग्रहभेदे “स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा। बिभर्त्ति चापरां संज्ञां कुमारः इति स ग्रहः” सुश्रुतः। १९शुद्धसुवर्णे न०मेदि०। संज्ञायां कन्। वरुणवृक्षे तिलकशाके। स्वार्थे क। बालके हेमच०। तस्येदं तस्य भावो वा अण्। कौमार शिशुत्वे बाल्यावस्थायां “देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा” गीता।

**कुमारकल्याण** न०। चक्रदत्तोक्ते घृतभेदे तल्लक्षणं यथा “शङ्खपुष्पी वचा ब्राह्मी कुष्ठं त्रिफलया सह। द्राक्षा सशर्करा शुण्ठी जीवन्ती जीरकं बला। शठी दुरालभा विल्वं दाडिमं सुरसः स्थिरा। मुस्तं पुष्करमूलञ्च सूक्ष्मैला गजपिप्पली। एषां कर्षसमैर्भागैर्घृतप्रस्थं विपाचयेत्। कषाये कण्टकार्य्याश्च क्षीरे तस्मिंश्चतुर्गुणे। एतत् कुमारकल्याणं घृतरत्नं सुखप्रदम्। बलवर्णकरं धन्यं पुष्ट्यग्निबलवर्द्धनम्। छायासर्व्वग्रहालक्ष्मीक्रिमिदन्तगदापहम्। सर्वबालामयहरं दन्तोद्भेदं विशेषतः”।

**कुमारघातिन्** त्रि०कुमारं हन्ति हन—णिनि। शिशुमारके।

**कुमारजीव** पु० कुमारं जीवयति जीव—णिच् अण् उप० स०। (जियापोता) जीवपुत्रवृक्षे रत्नमा०।

**कुमारदेष्ण** पु०कुमाराणां दाता दा—बा० दूष्णच्। कुमारदातरि “कुमारदेष्णाः जयतः पुनर्हणः” “ऋ० १०,३४,७,कुमारदेष्णाः कुमाराणां दातारः, भा०

**कुमारधारा** स्त्री भारतोक्ते तीर्थभेदे। “पितामहसरो गत्वा शैलराजसमीपतः। तत्राभिषेकं कुर्वाणोह्यग्निष्टोममवाप्नुयात्। पितामहस्य सरसः प्रस्नुता लोकपावनी। कुमारधारा तत्रैव त्रिषु लोकेषु विश्रुता। यत्र स्नात्वा कृतार्थोऽस्मीत्यात्मानमवगच्छति। षष्ठकालो-